# गौरी दशकम्

लीला लब्ध स्थापित लुप्ता खिल लोकां
लोकातीतैर् योगिभि रन्तश्चिर मृग्याम् ।
बालादित्य श्रेणि समान द्युति पुञ्जां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ १॥

प्रत्याहार ध्यान समाधि स्थिति भाजां
नित्यं चित्ते निर्वृति काष्ठां कलयन्तीम् ।
सत्य ज्ञानानन्दमयीं तां तनुरूपां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ २॥

चन्द्रापीडा नन्दित मन्दस्मित वक्त्रां
चन्द्रापीडा लंकृत नीलालक भाराम् ।
इन्द्रोपेन्द्रा द्यर्चित पादाम्बुज युग्मां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ३॥

आदिक्षान्ताम् अक्षर मूर्त्या विलसन्तीं
भूते भूते भूत कदम्ब प्रसवित्रीम् ।
शब्द ब्रह्मानन्दमयीं तां तटिदाभां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ४॥

मूलाधारा दुत्थित वीथ्या विधि रन्ध्रं

सौरं चान्द्रं व्याप्य विहार ज्वलिताङ्गीम् ।
येयं सूक्ष्मात् सूक्ष्म तनुस्तां सुखरूपां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ५॥

नित्यः शुद्धो निष्कल एको जगदीशो
साक्षी यस्याः सर्ग विधौ संहरणे च ।
विश्वत्राण क्रीडन लोलां शिवपत्नीं
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ६॥

यस्याः कुक्षौ लीन मखण्डं जगदण्डं
भूयो भूयः प्रादुरभू दुत्थित मेव ।
पत्या सार्धं तां रजताद्रौ विहरन्तीं
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ७॥

यस्या मोतं प्रोत मशेषं मणिमाला-
सूत्रे यद्वत् कापि चरं चाप्यचरं च ।
तामध्यात्म ज्ञान पद व्यागमनीयां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ८॥

नानाकारैः शक्ति कदम्बैर् भुवनानि
व्याप्य स्वैरं क्रीडति येयं स्वयमेका ।
कल्याणीं तां कल्पलता मानति भाजां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ ९॥

आशा पाश क्लेश विनाशं विदधानां
पादाम्भोज ध्यान पराणां पुरुषाणाम् ।
ईशा मीशार्धाङ्ग हरां ता मभिरामां
गौरीम् अम्बाम् अम्बुरुहाक्षी महमीडे ॥ १०॥

प्रातःकाले भाव विशुद्धः प्रणिधानात्
भक्त्या नित्यं जल्पति गौरि दशकं यः ।
वाचां सिद्धिं सम्पदं उच्चैः शिव भक्तिं
तस्या वश्यं पर्वत पुत्री विदधाति ॥ ११॥

श्रीमच्छंकर भगवतः कृतौ गौरी दशकम् सम्पूर्णम् ॥